ex libris Institut für Indologie zu Köln

**वलकम्** A procession.

**वलक्ष** See बलक्ष.

**वलग्नः, -ग्नम्** The waist; वलग्ने लग्नेयं सुगतमतसिद्धान्तसरणिः Lakṣmīlaharī 18.

**वलजः** A heap of grain; कर्षकेण वलजान् पुपूषता Śi. 14. 7. **-जम्** 1 A field. -2 Grain. -3 War. -4 A surrounding wall. **-जा** A beautiful woman. See Gīrvāṇa.

**वलन्तिका** A particular mode of gesticulation.

**वलम्बः** A perpendicular.

**वलभिः, -भी** *f.* [ वल्यते आच्छाद्यते वल्-अभि वा ङीप् ] ( Also frequently written बडभिः -भी ) 1 The sloping roof, the wooden frame of a thatch; धूपैर्जालविनिःसृतैर्वलभयः संदिग्धपारावताः V. 3. 2; सौधान्यत्यर्थतापाद्वलभिपरिचयद्वेषिपारावतानि M. 2. 12; Bhāg. 9. 10. 17. -2 The topmost part ( of a house ); a turret; दृष्ट्वा दृष्ट्वा भवनवलभीतुङ्गवातायनस्था Māl. 1. 15; वास्तोष्पतीनां च गृहैर्वलभीभिश्च निर्मितम् Bhāg. 10. 50. 54; Me. 40; Śi. 3. 53. -3 N. of a town in Saurāṣtra; अस्ति सौराष्ट्रेषु वलभी नाम नगरी Dk.; Bk. 22. 35. **-Comp. -निवेशः** an upper room.

**वलम्ब** See अवलम्ब.

**वलयः, -यम्** [ वल्-अयन् Uṇ. 4. 109 ] 1 A bracelet, armlet; विहितविशदबिसकिसलयवलया जीवति परमिह तव रतिकलया Gīt. 6; Bk. 3. 22; Me. 2, 62; R. 13. 21, 43. -2 A ring, coil; कोडाङ्कष्टव्रततिवलयासङ्गसंजातपाशः Ś. 1. 32; 7. 11. -3 The zone or girdle of a married woman. -4 A circle, circumference ( oft. at the end of comp. ); भ्रान्तभूवलयः Dk.; वेलावप्रवलयाम् ( उर्वीम् ) R. 1. 30; दिग्वलय Śi. 9. 8. -4 An enclosure, a bower; as in लतावलयमण्डप. **-यः** 1 A fence, hedge. -2 A branch. -3 A sore throat. -4 A kind of circular military array. **-यम्** 1 N. of certain round bones. -2 Multitude, swarm. ( वलयीकृ 'to form into a bracelet;' करेण शंभोर्वलयीकृताहिना सहिष्यते तत् प्रथमावलम्बनम् Ku. 5. 66; वलयीभू 'to serve as a bracelet or girdle' ).

**वलयित** *a.* 1 Surrounded, encircled, enclosed; मृत्पिण्डो जलरेखया वलयितः सर्वोऽप्ययं नन्वणुः Bh. 3. 26; U. 4. 30. -2 Whirling round. -3 Curling; वात्यासंवेगविष्वग्वितत-वलयितस्फीतधूम्याप्रकाशम् Mal. 5. 6.

**वलाकः** See बलाक.

**वलाकिन्** See बलाकिन्.

**वलासकः** 1 The cuckoo. -2 A frog.

**वलाहकः** See बलाहक.

**वलिः, -ली** *f.* ( Also written बलिः-ली ) 1 A fold or wrinkle ( on the skin ); बलिभिर्मुखमाक्रान्तम्. -2 A fold of skin on the upper part of the belly ( especially of females, regarded as a mark of beauty ); मध्येन सा वेदिविलग्नमध्या वलित्रयं चारु बभार बाला Ku. 1. 39. -3 The ridge of a thatched roof. -4 A line made on the body with fragrant unguents. -5 A handle of the Chāmara; रत्नच्छायाखचितवलिभिश्चामरैः क्लान्तहस्ताः Me. 37. -6 Sulphur. **-Comp. -पलितम्** Wrinkles and grey hair; गृहस्थस्तु यदा पश्येद् वलीपलितमात्मनः Ms. 6. 2. **-भृत्** *a.* curled, having curls ( as hair ); कुसुमोत्खचितान् वलीभृतश्चलयन् भृङ्गरुचस्तवालकान् R. 8. 53. **-मुखः, -वदनः** a monkey; ( वक्त्रम् ) उन्नम्य चुम्बति वलीवदनः प्रियायाः Māl. 9. 31. **-मुखम्** the sixth change which takes place in warm milk when mixed with butter-milk ( तक्र ).

**वलिकः, -कम्** The edge of a thatched roof.

**वलिन, वलिभ** *a.* [ बलि-न भ वा ] Wrinkled, shrivelled, contracted into wrinkles, flaccid; प्रणयिनं रभसादुदरश्रिया वलिभयालिभयादिव सस्वजे Śi. 6. 13.

**वलिमत्** *a.* Wrinkled.

**वलिर** *a.* Squint-eyed, squinting, oggling.

**वलिशम्, -शी** A fish-hook.

**वलिशानः** A cloud; Naigh. 1. 10.

**वलीकम्** [ वल्-ईकन् Uṇ. 4. 26 ] The edge of a thatched roof; यस्यामसेवन्त नमद्वलीकाः Śi. 3. 53.

**वलूकः** [ वल्-ऊकः Uṇ. 4. 42 ] A kind of bird. **-कम्** The root of lotus.

**वलूल** *a.* Strong, robust, powerful.

**वल्क्** 10 U. ( वल्कयति-ते ) To speak.

**वल्कः, -ल्कम्** [ बल्-संवरणे क, कस्य नेत्वम् Uṇ. 3. 42 ] 1 The bark of a tree; स वल्कवासांसि तवाधुना हरन् करोति मन्युं न कथं धनंजयः Ki. 1. 35; R. 8. 11; Bk. 10. 1. -2 The scales of a fish. -3 A part, fragment ( खण्ड ). -4 A garment; अथ स वल्क-दुकूल-कुथादिभिः Bk. 10. 1. **-Comp. -तरुः** the Areca palm ( Mar. पोफळ ). **-द्रुमः** the birch tree. **-पत्रः** Phoenix Paludosa ( Mar. हिंताल ). **-फलः** the pomegranate tree. **-लोध्रः** a variety of the Lodhra. **-वासस्** *n.* clothing made of bark.

**वल्कवत्** *m.* A fish ( having scales ).

**वल्कलः, -लम्** [ वल्-कलच् कस्य नेत्वम् Uṇ. 4. 5 ] 1 The bark of a tree. -2 A garment made of bark, bark-garment; इयमधिकमनोज्ञा वल्कलेनापि तन्वी Ś. 1. 20, 19. R. 12. 8; Ku. 5. 8; हैमवल्कलाः 6. 6 'wearing golden bark-dresses'; ( cf. चीरपरिग्रहाः in Ku. 6. 93 ). **-Comp. -संवीत** *a.* clad in bark.

**वल्कलिन्** *a.* 1 Yielding bark ( as a branch ). -2 Clothed in a bark-dress.

**वल्कितः** A thorn.

**वल्कुटम्** Bark, rind.

**वल्ग्** 1 U. ( वल्गति-ते, वल्गित ) 1 To go, move, shake; वल्गतः शत्रुमभितः Bhāg. 10. 44. 10; वल्गद्गरीयःस्तनकम्प्रकञ्चुकम्